# आमुखम्

राष्ट्रियपाठ्यचर्यायाः रूपरेखा (2005) ज्ञापयति यत् बालकानां यत् विद्यालयीयं जीवनम् अस्ति तद् विद्यालयीयं जीवनं बाह्य-जीवनेन सह योजनीयम्। अयं सिद्धान्तः पुस्तकीयस्य ज्ञानस्य तस्य न्यायस्य विपरीतः अस्ति यस्य प्रभाववशात् अस्माकं व्यवस्था अद्यावधि विद्यालयस्य गृहस्य च मध्ये अन्तरालं कल्पितवती। नूतनायां राष्ट्रिय-पाठ्यचर्यायाम् आधारितः पाठ्यक्रमः पाठ्यपुस्तकानि च अस्मिन् आधारभूते विचारे क्रियान्वयनस्य प्रयासः अस्ति। एतस्मिन् प्रयासे प्रत्येकं विषयं एकया दृढतरया भित्त्या आवरणस्य सूचनायाः संस्मारणस्य च प्रवृतेः विरोधः अपि सम्मिलितः अस्ति। आशासे यत् एते उपायाः अस्मान् राष्ट्रिय-शिक्षा-नीतौ (1986) वर्णितानां बालकेन्द्रितानां व्यवस्थानां दिशि अत्यधिकं दूरं यावत् नेष्यन्ति।

एतस्य प्रयत्नस्य साफल्यम् अधुना एतस्मिन् तथ्ये आश्रितम् अस्ति यत् विद्यालयानाम् आचार्याः अध्यापकाः च बालकान् कल्पनाशीलानां गतिविधीनां प्रश्नानां च साहाय्येन शिक्षणस्य काले च स्वस्य अनुभवैः चिन्तनस्य कियतः अवसरान् कल्पयन्ति। अस्माकम् एतत् मन्तव्यं स्यात् यत् यदि समयं स्थानं स्वतन्त्रतां च बालकेभ्यः प्रयच्छामः तर्हि बालकाः ज्येष्ठैः प्रदत्ताभ्यां सूचना-सामग्रीभ्यां युक्त्वा सङ्घर्षं च कृत्वा नूतनस्य ज्ञानस्य सर्जनं कुर्वन्ति। शिक्षायाः विविधानां साधनानाम् एवञ्च स्रोतसाम् अवहेलनस्य प्रमुखं कारणं पाठ्यपुस्तकं परीक्षायाः एकमात्रम् आधारः इति प्रवृत्तिः अस्ति। सर्जनस्य प्रारम्भस्य च विकासार्थम् आवश्यकम् अस्ति यत् वयं बालकाः शिक्षणस्य प्रक्रियायां सहभागिनः सन्ति इति अङ्गीकुर्मः अपि च तान् सहभागिनः मन्यामहे, ते बालकाः ज्ञानस्य निर्धारितायाः मात्रायाः ग्राहकाः सन्ति इति मन्तव्यं त्यजामः।

एते उद्देश्याः विद्यालयस्य दैनिके जीवने कार्यशैल्यां च अत्यधिकस्य परिवर्तनस्य अपेक्षां कुर्वन्ति। दैनन्दिन्यां समय-सारण्यां स्थितिस्थापकत्वम् (लचीलापन) तावदेव आवश्यकम् अस्ति यावत् वार्षिकस्य तिथिपत्रकस्य क्रियान्वयने जागरूकता, यतः शिक्षणस्य कृते नियतानां दिनानां सङ्ख्या वास्तविकं रूपं स्वीकुर्यात्। शिक्षणस्य मूल्याङ्कनस्य च विधयः अपि एनं विषयं निर्धारीकरिष्यन्ति यत् इदं पाठ्यपुस्तकं विद्यालये बालानां जीवनं मानसिकस्य उद्वेगस्य खिन्नतायाः च स्थाने हर्षस्य वातावरणस्य निर्माणे कियता प्रभाविरूपेण चरितार्थं भविष्यति। भारस्य समस्यायाः समाधानार्थं पाठ्यक्रमस्य निर्मातारः विभिन्नेषु चरणेषु ज्ञानस्य पुनर्निर्धारणस्य समये बालानां मनोविज्ञानं मनसि निधाय एवञ्च अध्यापनस्य कृते उपलब्धः समयः कियान् अस्ति इति एतस्य विषयस्य अवधानं पूर्वापेक्षया अधिकेन सचेतरूपेण करणस्य प्रयासं कृतवन्तः। एषः प्रयासः इतोऽपि गभीरतया स्यात् एतस्मिन् प्रयत्ने इदं पाठ्यपुस्तकं विचारविनिमयस्य एवञ्च विस्मयस्य, लघुसमुहेषु वार्तालापस्य तथा च चर्चायाः कृते हस्ताभ्यां क्रियमाणानां गतिविधीनां कृते प्राथमिकतां प्रयच्छति।

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् एतस्य पुस्तकस्य रचनायाः कृते निर्मितायाः पाठ्यपुस्तक-निर्माण-समितेः परिश्रमस्य कृते कृतज्ञतां प्रकटीकरोति। परिषद् सामाजिक-विज्ञानम् इति पाठ्यपुस्तकस्य परामर्शदातृ-समितेः अध्यक्षस्य प्रोफेसर-हरि-वासुदेवन-महोदयस्य तथा च

एतस्य पाठ्यपुस्तकस्य समितेः मुख्यपरामर्शदातुः नीलाद्रिभट्टाचार्यस्य विशेषरूपेण आभारिणी अस्ति। एतस्य पाठ्यपुस्तकस्य विकासे बहुभिः शिक्षकैः योगदानं कृतम्। एतं योगदानं सफलीकर्तुं वयं तेषां प्राचार्याणाम् अपि अभारिणः स्मः । वयं तानि सर्वाणि सङ्घटनानि संस्थाः च प्रति कृतज्ञाः स्मः ये स्वस्य सामग्रयाः संसाधनानां सहयोगिनां च साहाय्यप्रदाने औदार्य्यपूर्वकं सहयोगम् अकुर्वन्।

वयं माध्यमिक-शिक्षा-विभागस्य तथा च उच्चशिक्षाविभागस्य मानव-संसाधन-विकास-मन्त्रालय-द्वारा नियुक्तस्य प्रोफेसर-मृणाल-मोरी-महोदयस्य अपि च प्रोफेसर-जी.पी.देशपाण्डे-महोदयस्य अध्यक्षतायां निर्मितायां निरीक्षण-समितेः सदस्यानां कृते ये स्वकीयं मूल्यवन्तं समयं सहयोगं च दत्तवन्तः तेषां कृते धन्यवादस्य ज्ञापनं कुर्मः । व्यवस्थागतपरिष्कारार्थं तथा च स्वप्रकाशनानि निरन्तरं प्रभावीकर्तुं समर्पिता परिषद् टिप्पणीनां परामर्शानां च स्वागतं करिष्यति । यैः भाविसंशोधनानि स्वीकर्तुं शक्यानि स्युः ।

निदेशकः

नवदेहली
२० नवम्बरः २००६

राष्ट्रिय शैक्षिकानुसन्धानं
प्रशिक्षण परिषद् च

# पाठ्यपुस्तक-निर्मातृ-समितिः

**अध्यक्षः, सामाजिकविज्ञान-पाठ्यपुस्तक-परामर्शदातृ-समितिः**

हरिवासुदेवनः, प्रोफेसरः, इतिहासविभागः, कलकत्ताविश्वविद्यालयः, कोलकाता

**मुख्यपरामर्शदाता**

नीलाद्रिभट्टाचार्यः, प्रोफेसरः, इतिहासाध्ययनकेन्द्रम्, जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली।

**परामर्शदाता**

कुमकुमरायः, एसोशिएटप्रोफेसरः, इतिहासाध्ययनकेन्द्रम्, जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली।

**सदस्याः**

जयामेननः, रीडरः, इतिहासविभागः, अलीगढमुस्लिमविश्वविद्यालयः, अलीगढम्।

पी.के.बसंतः, *रीडरः*, इतिहाससंस्कृतिविभागः, मानविकीभाषासंकायः, जामियामिल्लिया-इस्लामिया, नवदेहली।

रनबीरचक्रवर्ती, *प्रोफेसरः*, इतिहासाध्ययनकेन्द्रम्, जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली।

विश्वमोहनझा, *रीडरः*, इतिहासविभागः, आत्मारामसनातनधर्ममहाविद्यालयः, दिल्लीविश्वविद्यालयः, नवदेहली।

एन.पी.सिंहः, प्रधानाचार्यः,राष्ट्रियप्रतिभाविकासविद्यालयः, नवदेहली।

शुचिबजाजः, पी.जी.टी. (इतिहासः), स्प्रिंगडेल्सस्कूल, नवदेहली।

गौरीश्रीवास्तवः, *रीडरः*, महिलाध्ययनविभागः, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्।

अनिलसेठी, *प्रोफेसरः*, सामाजिकविज्ञानशिक्षाविभागः, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्

**हिन्द्यनुवादः**

हीरामनतिवारी, असिस्टेंटप्रोफेसरः, इतिहासाध्ययनकेन्द्रम्, जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली।

नूतनझा, शिक्षिका, मीराम्बिकास्कूल, श्री अरविन्दो आश्रमः, नवदेहली।

पी.के.बसन्तः

सीमाएस.ओझा

**सदस्य-समन्वयकः**

सीमा एस.ओझा, प्रवक्त्री, सामाजिकविज्ञानशिक्षाविभागः, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्।

# भारतीय-संविधानम्

## उद्देशिका

वयं भारतीयाः, भारतदेशम् एकं [1][**सम्पूर्ण-प्रभुत्व-सम्पन्नम्, समाजवादि, पन्थ-निरपेक्षम्, लोकतन्त्रात्मक-गणराज्यं**] निर्मातुं तथा च तस्य समस्तनागराणां कृते;

सामाजिकम् आर्थिकं तथा च राजनैतिकं न्यायम्, विचारस्य, अभिव्यक्तेः, विश्वासस्य, धर्मस्य,

उपासनायाः च स्वतन्त्रताम्,

प्रतिष्ठायाः अवसरस्य च समतां

प्रापयितुं

तथा च तेषु **सर्वेषु** मानवीयगौरवस्य तथा च [2][**राष्ट्रियैकतायाः अखण्डतायाश्च] सुनिश्चयकर्त्री** बन्धुतां संवर्धयितुं.......

दृढसङ्कल्पाः भूत्वा **अस्यां स्वसंविधानसभायाम्** अद्य नवम्बरमासस्य 26 तमे दिनाङ्के 1949 तमे ख्रीस्ताब्दे (मार्गशीर्षे शुक्लसप्तम्यां 2006 तमे विक्रमसंवत्सरे) **एतत् संविधानम् अङ्गीकुर्मः अधिनियमितं तथा च आत्मार्पितं कुर्मः ।**

---

1. संविधानाधिनियमः (द्वाचत्वारिंशं संशोधनम्) 1976 इत्यस्य द्वितीयेन अनुभागेन (3.1.1977 तः) "प्रभुत्व-सम्पन्नलोकतन्त्रात्मक-गणराज्यम्" इत्यस्य स्थाने प्रतिस्थापितम् ।

2. संविधानाधिनियमः (द्वाचत्वारिंशं संशोधनम्) 1976 इत्यस्य द्वितीयेन अनुभागेन (3.1.1977 तः) "राष्ट्रस्य एकता" इत्यस्य स्थाने प्रतिस्थापितम् ।

## इतिहासं किमर्थं पठेम ?

अस्मिन् वर्षे षष्ठकक्षायां भवन्तः इतिहासं पठिष्यन्ति । कैश्चित् अन्यैः विषयैः सह इतिहासः समाजिकविज्ञानस्य भागः मन्यते । समाजविज्ञानेन वयं सामाजिकविश्वस्य कार्यप्रणाल्याः विषये सरलतया अवगच्छामः । समाजविज्ञानम् अस्मान् जीवनस्य विभिन्नपक्षाणां विषये बोधयति, वयं अनेन समाजविज्ञानेन अर्थव्यवस्थायाः सामाजिकराजनैतिक-जीवनयोः व्यवस्थाविषये अपि ज्ञास्यामः । इतिहासम् अतिरिच्य समाजिकविज्ञानस्य अन्ये विषयाः प्रायः वर्तमानसंसारस्य विषये एव सूचयन्ति । इतिहासः बोधयति यत् वर्तमानसंसारः कथं विकसितः । इतिहासः अस्मान् वर्तमानकालस्य यः अतीतः अस्ति तस्मिन् विषये बोधयति ।

वयं यस्मिन् समाजे निवसामः तस्य परिवेशे वासस्य अस्माकं स्वभावः जायते । वयं मन्यामहे यत् संसारः सर्वदा एतादृशः एव आसीत् । वयं विस्मरामः यत् जीवनं सर्वदा एतादृशं नासीत् यादृशम् अद्य दृश्यते । उदाहरणार्थं किं भवन्तः एतादृशस्य संसारस्य कल्पनां कुर्तुं शक्नुवन्ति यत्र वह्निः न स्यात् ? कथं वासः स्यात् एतादृशे संसारे यत्र कृषिकार्यस्य आविष्कारः न जातः स्यात् ? अथवा तस्मिन् युगे जीवनं कीदृशं स्यात् यदा जनाः अधिककालावधिकाः यात्राः तु कर्तुं शक्नुवन्ति स्म परन्तु न राजमार्गाः आसन् न रेलयानानि आसन् ? इतिहासः तादृशान् अतीतान् प्रति अस्मान् नेतुं शक्नोति ।

अनेन प्रकारेण इतिहासः काचित् रोमाञ्चकयात्रा अस्ति । इयं यात्रा भवतः संसारविषये सर्वं सूचयति । इयम् अस्मान् पृथक्संसारे पृथक्युगे च नयति यत्र जनानां जीवनं पृथगासीत् । तेषाम् अर्थव्यवस्था-समाज-मान्यता-विश्वास-वस्त्र–गृह-निवास-कला-शिल्पानि इति एतानि सर्वाणि पृथक् आसन् । इतिहासः एतादृशस्य संसारस्य विषये अस्मान् बोधयितुं शक्नोति ।

भवताम् एतस्मिन् विषये अस्वीकृतिः भवितुं शक्नोति यत् यम् अतीतकालस्य घटनाः वार्ताः वा किमर्थं जानीयाम ताः चिन्तयित्वा किमर्थं चिन्तामग्नाः भवेम याः अधुना न सन्ति ।

परन्तु इतिहासः केवलम् अतीतकालस्य विषये नास्ति परन्तु वर्तमानस्य विषये अपि अस्ति । अद्य वयं यस्मिन् संसारे स्मः तस्य निर्माणं अस्मत्पूर्वजाः कृतवन्तः । तेषां जीवने ते यानि सुखदुःखानि सोढवन्तः तात्कालिकसमस्याः समाधातुं तेषां प्रयासाः आविष्काराः च आसन् एतेषां कारणात् एव मानवसमाजस्य परिवर्तनम् अभूत् । एतानि परिवर्तनानि प्रायः शनैः शनैः भवन्ति अतः तस्मात् तात्कालिकजनाः अपि तेषां विषये न जानन्ति स्म । अनन्तरं यदा वयम् अतीतं पश्यामः इतिहासं च पठामः तदा वयं अनुभवामः यत् परिवर्तनानि कथम् अभवन् । इतिहासं पठित्वा एव वयं चिरकालात् शनैः शनैः जातानां परिवर्तनानां प्रभावं द्रष्टुं शक्नुमः । इतिहासं पठित्वा एव वयम् अवगन्तुं शक्नुमः यत् आधुनिकसंसारः यत् दृश्यते तत् अनेकशताब्देषु जातपरिवर्तनानां परिणामः अस्ति ।

वयम् एतस्मिन् वर्षे यत् पुस्तकं पठिष्यामः तत् अस्मान् प्रचीनतमान् अतीतान् प्रति नेष्यति । अग्रिमयोः द्वयोः वर्षयोः भवताम् इयं यात्रा पश्चात्जात-कालखण्डेभ्यः गमिष्यति । अस्मिन् पुस्तके भवन्तः केवलं साम्राज्ञी-सम्राजाम् अपि च तेषां विजयानां नीतीनां च विषये एव न पठिष्यन्ति अपितु भवन्तः व्याध-कृषक-शिल्पकार-वणिजां च विषये ज्ञास्यन्ति । भवन्तः अग्नेः लोहाविष्कारस्य च विषये अपि ज्ञास्यन्ति गोधूम-धान्यकयोः च कृषिकार्यं कदा आरब्धं ग्रामनगराणि च कदा विकसितानि ? भवन्तः तीर्थयात्रिणां साधूनां भवनानां चित्राणां धर्माणां विश्वासानां च विषये अपि पठिष्यन्ति भवन्तः द्रक्ष्यन्ति, यत् इतिहासः केवलं महाजनानां जीवनवृत्तान्तं नास्ति । इतिहासः सामान्यस्त्रीणां पुरुषाणां बालानां च जीवनक्रियाकलापयोः विषये अपि अस्ति । इतिहासः केवलं राजनैतिकघटनानां विषये नास्ति अपि तु समाजे जायमानस्य प्रत्येकं घटनाक्रमस्य विषये अपि अस्ति ।

एतत् पुस्तकं पठित्वा भवन्तः एतस्मिन् विषये ज्ञातुं शक्ष्यन्ति यत् इतिहासकाराः कथम् अतीतस्य विषये जानन्ति । गुप्तचराः इव इतिहासकाराः अपि अतीतकालिकैः जनैः यानि यानि कार्याणि कृतानि तेषां कार्याणां यानि चिह्नानि वा भवन्ति तेषाम् चिह्नानाम् अध्ययनं कुर्वन्ति । अतीतस्य प्रत्येकम् अवशेषाः यथा पाषाणमयोपकरणानि पादपानाम् अवशेषाः अस्थीनि लिखितसामाग्री चित्राणि आभूषणानि उपकरणानि अभिलेखाः नाणकानि भवनानि मूर्तयः पात्राणि इत्येतानि सर्वाणि पुरातनकालस्य विषये बोधयतुं शक्नुवन्ति । इतिहासकाराः पुरातत्त्वविदः च एतेषां स्रोतसाम् अध्ययनं कृत्वा एतानि अवगन्तुं प्रयतन्ते । अस्मिन् पुस्तके एतादृशानि स्रोतांसि दर्शयिष्यन्ते तथा च भवन्तः एतस्मिन् विषये अपि ज्ञास्यन्ति यत् इतिहासकाराः एतेषां सर्वेषाम् उपकरणानां मूल्याङ्कनं कथं कुर्वन्ति ।

परन्तु इतिहासस्य अध्ययनं वयं केवलम् अतीतं ज्ञातुम् एव न कुर्मः । इतिहासः योग्यताविकासाय कौशलविकासाय च अस्माकं सहायतां करोति । अतीतसंसारं गभीरतया ज्ञातुं कस्यचित् एतादृशसंसारस्य जनानां विषये ज्ञातुं यस्य संसारस्य जीवनम् अस्मभवं सर्वथा भिन्नम् आसीत् नूतनाः उपायाः शिक्षणीयाः भवन्ति । यदा वयम् एतत् कार्यं कुर्मः तदा अस्माभिः जागरूकतया इदं ज्ञातव्यं भवति अपि च वर्तमानकालिकजगतः किञ्चित् बहिः आगन्तव्यं भवति । अयं कश्चित् प्रारम्भः भवति अपरान् जनान् ज्ञातुम् अपि च तेषां क्रियकलापान् ज्ञातुम् । अस्माकं कृते अयं कश्चन शिक्षाप्रद-संवर्धकानुभवः भवितुं शक्नोति अतः स्वस्कन्ध-परिचालनात् प्राक् आत्मनः कञ्चित् प्रश्नं पृच्छतु किम् अहम् एतत् जिज्ञासामि यत् अहं कः अस्मि ? किं अहं एतत् अवगन्तुम् इच्छामि यत् समाजः कथं चलति ? अहं यस्मिन् जगति अस्मि किं तत् ज्ञातुं जिज्ञासामि ? यदि त्वं जिज्ञाससि तर्हि तव कृते आवश्यकता भविष्यति इदं ज्ञानस्य यत् अस्माकं समाजः कथं विकसितः अभवत् अपि च कथम् अस्माकम् अतीताः अस्माकं वर्तमानाय आकारं दत्तवन्तः ।

नीलाद्रि-भट्टाचार्यः<br>इतिहासस्य मुख्यपरामर्शदाता

# आभारः

इदं पुस्तकं बहुभ्यः मासेभ्यः लिख्यते स्म । एतस्य पुस्तकस्य सज्जीकरणदले अनेके विद्यालयीयाः शिक्षकाः, महाविद्यालस्य विश्वविद्यालयस्य च विशेषज्ञाः अपि च राष्ट्रियानुसन्धान-प्रशिक्षण-परिषदः संकायसदस्याः च सम्मिलिताः आसन् । चित्राणां चयने अभ्यासप्रश्नानां च सज्जीकरणे एतस्य दलस्य सर्वे सदस्याः सहयोगं कृतवन्तः । विभिन्नविषयेषु अस्माभिः परस्परं गहना विस्तृता च चर्चा कृता अस्ति।

अस्माभिः स्वस्य बालपाठकानाम् – अपूर्व-अवराम-मल्लिका-विश्वनाथन-मीराविश्वनाथनानां च परामर्शैः टिप्पणीभिः च बहु लाभः अवाप्तः। पुस्तकलेखन-प्रक्रियायाम् एतस्य प्रारूपेषु बहवः जनाः परामर्शान् दत्तवन्तः। वयम् अस्मिन् पुस्तके तेषां परामर्शानां संयोजनस्य प्रयासं विहितवन्तः । वयं विशेषतया राष्ट्रियनिरीक्षण-समितेः सदस्यान् प्रति आभारिणः स्मः । ते बहून् परामर्शान् दत्तवन्तः सन्ति । एतस्य पुस्तकस्य प्रारूपविषये आलोचनात्मक-परामर्शानां कृते वयं प्रोफेसर-रोमिलाथापर-उमाचक्रवर्ती-जायरस-बानाजी-उपिन्दर-सिंह-एकलव्यकेसी-एन-सुब्रह्मण्यम्-मेरीजानान् प्रति आभारिणः स्मः । प्रोफेसर-बी-डी-चट्टोपाध्याय-प्रोफेसर-कुणाल-चक्रवर्ती-प्रोफेसरविजयारामास्वामी-प्रोफेसर-एस-आर-वालिंबे-नैनादयालाः अपि अस्य पुस्तकस्य केषाञ्चित् भागानां विषये परामर्शं दत्तवन्तः। प्रोफेसरनारायणीगुप्ता नैरन्तर्येण अस्माकं सहयोगं कृतवती।

अभिलेख-नाटक-स्मारक-मूर्ति-चित्र-पुरातात्त्विक-ऐतिहासिकस्थल-रेखाचित्र-प्राप्तखननमृण्मयपात्रोपकरणान्य-वस्तु-चित्राणां कृते वयं निम्नलिखितानाम् आभारिणः स्मः – महानिदेशक-भारतीयपुरातत्त्वसर्वेक्षण-सुरेन्द्रकौलस्य सांस्कृतिक-स्रोतप्रशिक्षणकेन्द्र-नवदेहल्याः पूर्णिमामेहतायाः अमेरिकन-इंस्टीट्यूट्-आफ-इंडियन-स्टडीज-हरियाणायाः सहकर्मिणः के.पी.रावस्य हैदराबाद-विश्वविद्यालयस्य अपि च भारतीजगन्नाथनस्य । वयं पाण्डुलिपिचित्रदानाय गीताञ्जलिसेरेन्द्रनस्य अपि च नेशनल-मैनुस्क्रिप्ट-मिशन-देहल्याः सहकर्मिणाम्अपि आभारिणः स्मः। कैथरीन-जारीजः मेहरगढस्थ-रेखाचित्राङ्कनस्य अनुमतिं दत्तवान्। वयं बालकानां चित्रदानाय यूनिसेफ-नवदेहल्याः उमेशमत्तामहोदयस्य राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषदः आर.सी.दासस्य अपि च स्प्रिंगडेल्सविद्यालयस्य आभारिणः स्मः।

अस्य पुस्तकस्य मानचित्राणि जवाहरलालनेहरुविश्वविद्यालयस्य के.वर्गीजेन अपि च जम्मू-विश्वविद्यालयस्य इतिहासविभागस्य श्यामनारायणलालेन रचितानि सन्ति । वैज्ञानिक-तकनीकी-शब्दावली-आयोग-नवदेहल्याः प्राप्तावकाशानुसन्धानाधिकारी (इतिहासः पुरातत्वं च) राजेन्द्रप्रसादतिवारीमहोदयः पुस्तके विद्यमानतकनीकीशब्दानां शुद्धीकरणे योगदानं कृतवान् । विजय-कुमारशर्मा पुस्तकस्य प्रतिलिपिसम्पादनं कृतवान् अपि च पाण्डुलिपेः अशुद्धिसंशोधनं कृतवान्। अनिमेषरायः ऋतुटोपा च आर्टक्रिएशन्स-नवदेहली अस्य पुस्तकस्य आकारस्य सज्जायाः टङ्कणव्यवस्थापनस्य च कार्यं कृतवन्तौ । हिन्दीटङ्कणस्य कार्यं विजयकम्प्यूटर इति कृतवान् । वयम् एतेषां सर्वेषाम् कृतज्ञाः स्मः।

अस्माभिः प्रत्येकं चित्रस्य मूलस्रोतसः उल्लेखः कृतः अस्ति, परन्तु यदि असावधानतया काचित् त्रुटिः जाता स्यात् तर्हि वयं क्षमाप्रार्थिनः स्मः । आशास्महे एतस्य पुस्तकस्य कृते बहवः परामर्शाः आगमिष्यन्ति ये भविष्ये अपि एतस्य पुस्तकस्य सुपरिष्कृत-संस्करण-प्रकाशनस्य कृते सहायकाः भविष्यन्ति।

एतस्य पुस्तकस्य सज्जीकरणे सहयोगार्थं वयं राष्ट्रियानुसन्धान-प्रशिक्षणपरिषदः सामाजिकविज्ञानस्य एवञ्च मानविकीशिक्षाविभागस्य प्राध्यापिकाध्यक्षायाः सवितासिन्हावर्यायाः धन्यवादं ज्ञापयामः । सवितासिन्हा-प्रोफेसराध्यक्ष-सामाजिकविज्ञान-मानविकीशिक्षाविभाग-राष्ट्रियानुसन्धान-प्रशिक्षणपरिषदः च धन्यवादं कुर्मः।

वयं ज्योतिगोयलस्य (डी.टी.पी. आपरेटर) सुनयनातिवारी वरिष्ठशुद्धिकर्त्र्याः च एतस्य पुस्तकस्य विकासस्य विभिन्नचरणेषु सहयोगाय विशेषाभारिणः स्म। अस्माभिः प्रकाशनविभागस्य पूर्णसहयोगः एवञ्च सौविध्यानि प्राप्तानि। एतदर्थं वयं विशेषरूपेण आभारिणः स्मः।